No. ४३६३

Title मीमांसा सार संग्रहः १२शाध्याय.

Author अप्प दीक्षितः

Extent 6 Age ९

Subject पू. मीमांसा

✓

मीमांसासार संग्रहः

४२६२

॥श्रीमहागणपतये नमः॥ ॥ॐ॥ अथातो धर्मजिज्ञासेति सूत्रे प्रमाणस्वरूपसाधनफलैर्धर्मस्य विचारं प्रतिज्ञाय प्र
थमाध्याये तस्मिन् प्रमाणं निरूपितं। तत्र प्रथमे पादे साक्षाद्धर्मे प्रमाणं श्रुतायाश्चोदनायाः पौरुषेयत्वाद्यप्रामाण्यहेतु
शंकानिराकरणपूर्वकं तत्प्रामाण्यमुपपादितं। द्वितीयपादे अर्थवादमंत्रयोर्विध्यपेक्षितद्रव्यदेवतादिस्मारकत्वेन स्तुत्य
र्थस्मृतिसमर्पकतया तृतीयपादे मन्वादिप्रणीतानां वेदाविरुद्धस्मृत्यादीनां मूलवेदानुमापकतया। चतुर्थे उद्भिदा
यजेत जुहोति श्येनेनाभिचरन् यजेतेत्यादिविधिवाक्यगतानामुद्भिदाग्निहोत्रश्येनादीनां नाम्नां कर्मभेदः। नाम्नां धर्मातिदेशः। ना
म्नाह्वरस्य अस्यानुवादः इत्यादिप्रयोजनवत्वात् कर्मनामतया च तत्प्रामाण्यमुपपादितं। एवं प्रमाणसिद्धस्य धर्मस्य प
रस्परभिन्नस्वरूपं द्वितीयाध्याये निरूपितं। तत्र यजति ददाति जुहोतीति चोदनादिषु यज्यादिधात्वनुभेदरूपेण
शब्दांतरेण यागदानहोमानां भेदः। समिधो यजति तनूनपातं यजतीत्यादिविधिषु यजतीति पदेन कृत्वा
अभ्यासेन विशेषः पुनः श्रुतिरूपेण प्रयाजानां भेदः। सप्तदश प्राजापत्यान् पशूनालभत इत्यत्र द्रव्यदेवतासंब
ध भेदेन्या सप्तदशसंख्यया तदनुमेययागानां भेदः। अथैष ज्योतिरित्यादिवाक्येषु ज्योतिरादिनामधेयैस्त
न्नामकयागानां प्रकृतज्योतिष्टोमाद्भेदः। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्य
त्रामिक्षारूपगुणांतरावरुद्धे यागे निवेशमलभमानेन वाजिनगुणेन यागस्यामिक्षायागाद्भेदः। प्रकरणां
२ न्मा तरेण नित्याग्निहोत्रात् मासाग्निहोत्रस्य भेद इत्येवं द्वितीयाध्याये कर्मभेदः प्रपंचितः। तृतीयाध्याये
भिन्नानां कर्मणां श्रुतिलिंगादिभिः प्रमाणैः शेषशेषिभावो निरूपितः॥ दृष्टादृष्टार्थयाज्यानि निश्चितांगा
निप्रवदनं॥

सहस्रा॰ घ करणसंग्र १

दृष्टार्थान्यवघातादीनि नियमादृष्टार्थानि क्रियो निष्पाद्यमप्यदृष्टं अवहननेनैव तंडुलानिष्पाद्य । नन
खविदलनेनेति नियमस्य प्रयोजनापेक्षायां नियमप्रयोजनं च कल्प्यमानं नियमादृष्टमित्युच्यते ॥
दृष्टार्थानि चतुर्थ्यः स्युर्जातिद्रव्यगुणक्रियाः ॥ पशुना यजेतेत्यत्र छाग [illegible] स्वाश्रयद्रव्येण दृष्टेनैवोप
कारेण यागांगत्वं । अरुणया क्रीणातीत्यत्र । रूपगुणस्य [illegible] क्रियांगत्वं । विशिष्टसाधनत्वस्य
विशेषणाधीनप्रतिपत्तिकत्वात् तदाश्रयद्रव्यस्यानुसारादेव क्रियानिर्वृत्तिर्दृष्टमेव प्रयोजनं । क्रियापि
चावघातादिर्दृष्टैव तुषाद्यर्थं इवा यांसा संनिपत्योपकारिका [illegible] चक्षते । अदृष्टार्था । क्रिया द्विधा संनिपात्या
[illegible]हतेऽदृष्टार्थत्वे क्रियायाः एव । प्रोक्षणादयः संनिपत्योपकारकाः । प्रयाजादयः आरादुपकारकाः ॥
अदृष्टद्वारस्वकारकापूर्वयोरुपकारकत्वात् । उभयार्थस्तु पशुपुरोडाशयागः । उभयार्थो याग एष
यागोद्देशात् फली ॥ साहित्यागांशेनादृष्टं उद्देशांशेन दृष्टं देवतास्मरणं करोतीति उभयार्थः । त
त्र दृष्टार्थानि [illegible] कर्माण्यधिकारकारणं [illegible] विकारादीनि कुर्वन्ति । तत्साधनप्र
धानोपकारका [illegible] पुरोडाशसंयोगात् पयो दधि व्रीहीन् वहतीति कर्मणः । आरादुपका
एवं कर्मण्यवघातः कर्त्तरि वपनतीर्थस्नानदीक्षाः करणे प्रयाजशेषेण हवींष्यभिघारयती
त्यभिघारणं संप्रदाने पशुपुरोडाशयागः । अपादाने अग्नेस्तृणान्यपचिनोतीति ।
अधिकरणे तद्देपयसि दध्यानयति । एवं यूपं तक्षति । आहवनीयमादधातीत्यादिषु द्रष्टव्यं ॥

शिव १

कर्त्तुः समीहितं येन सिध्यत्यंगं तदुच्यते ॥ प्रमाणानि च विधिस्तत्र श्रुतिलिंगादिसंयुतः ॥ साक्षाद्ध्यर्थभा
वनाया विशेषस्यासमर्पणार्थं श्रुत्यादीनि विधेः सहकारीणि ॥ विनियोगकारणानीत्यर्थः ते भावनाविशेष
णासमर्पकत्वमेव श्रुत्यादीनां विनियोजकत्वं ॥ पशुत्वेकत्वपुंस्त्वादीनां यागभावनाविशेषणानां यागविशे
षणीयस्य राजन्वत् ॥ प्राप्तिकिः ॥ तत्रैकशब्दोपादानलक्षणयोः नैकार्थबोधकत्वेन नानार्थवैलक्षण्यं ॥ प्र
त्ययश्रुत्या कर्तृसंख्यादीनां भावनाविशेषणत्वं ॥ पदश्रुत्या साधारणस्य विभक्तिश्रुत्या पुरंतरोपतापश्वादीनां
त्वा संख्या ॥ नियोगश्च भावनाविशेषणत्वमित्याद्यः ॥ प्रत्ययश्रुत्या संबध्यारव्यकारकविशेषणत्वं ॥ प्रत्ययस्य ना
नार्थत्वेपि पृथक्पृथक् अनन्वितानामेव विदेवनादीनां प्रत्यायिकाक्षादिवैलक्षण्यपनश्रुतिः प्रमाणान्तरं कारान्तरं
त्वनिरपेक्षशब्दः श्रुतिः ॥ सा त्रिधा विधात्री ॥ अभिधात्री ॥ विनियोक्त्री च ॥ लिङादिश्रुतिः विधात्री ॥ द्वंद्वादिश्रुतिः ॥ अ
2 भिधात्री ॥ विनियोक्त्री तु कप्रत्ययरूपा ॥ एकपदरूपा एकविभक्तिरूपा इति त्रिधा ॥ तत्र आद्या पशुना यजेतेति तृती
सा या ॥ सा हि स्वार्थकरणकारकं प्रति स्वोक्तैकत्वसंख्यायाः शेषत्वमर्पयति द्वितीया ॥ यजेतिपदे ते न प्रत्ययोक्त ते
भावनां प्रति द्रव्यस्य भावनां यागस्य शेषतोपनीयते ॥ तृतीया शेषित्वबोधिका शेषत्वबाधकेतिद्विधा ॥
व्रीहीन्प्रोक्षतीत्यादिषु द्वितीया ॥ व्रीह्यादीनां प्रोक्षणादिक्रियां प्रति ईप्सिततमत्वरूपशेषित्वबोधिका ॥ क्रीते
सोमे मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र चतुर्थीश्रुतिः ॥ मैत्रावरुणस्येक्रियेप्सितं कर्मणा अभिप्रयमाणत्वरू तमेन
पशेषित्वबोधिका ॥ अरुणया क्रीणातीत्यत्र आग्नेयस्य चात्वालान्मृद माहरतीत्यत्र मृदाहरणक्रियां शे
चात्वालस्य शेषं हि विनासारयतीत्यत्र षष्ठ्यादिकारकत्वाद्धि प्रयोगकारः ॥ इमं मे अंत्रे आसमकर्मपि विनियुंजते ॥

कपभावनां प्राति २ प्रधान ३

रू ५   नु २

हविरासादनक्रियांप्रतिवेधाश्चतृतीयापंचमीसप्तम्यश्शेषत्वबोधिकाः। षष्ठीतु क्रचिद्ध्रुवेंद्रियकामस्यजुहुया

दित्यादौशेषित्वबोधिका। यजमानस्ययाज्यत्वादौशेषत्वबोधिका। संबंधमात्रेतुशिष्टा याः प्रथमाः याःपता

द्यनुसारेणाभयथापिपर्यवसानसंभवात्। वस्तुसामर्थ्यंलिंगं। तद्विविधं। शाब्दसामर्थ्यमर्थसामर्थ्यंच। बर्हिर्देवसदनं

दामीतिमंत्रस्यलवनप्रकाशनशाब्दसामर्थ्यरूपात्लिंगाल्लवनशेषता। सुग्धितिनावघतिस्रुवेणावघतिस्स्रुनाव

घतीत्यवदानसामान्यसाधनत्वेनक्लृप्तानांस्रुचादीनांतत्रसामर्थ्यलिंगात्तितिक्ष्वमीसङ्वङ्प्रपुरोशा

द्यवदानेषुशेषत्ता। शेषित्वस्यशेषत्वस्यबाधिकयाश्रुत्यारहितश्शपदस्समभिव्याहारोवाक्यं। यथाऽग्निहोत्रंजु

हुयात्स्वर्गकामइतियथावामैत्रावरुणश्शप्रेष्यतिचान्वाहवेति। नहियागभावनांप्रतिस्वर्गकामस्यभाव्यत्वेनशेषि

त्वबोधिकाद्वितीयादिश्रुतिः। प्रेषानुवचनंप्रतिमैत्रावरुणस्यकर्तृत्वेनशेषत्वबोधिकातृतीयाश्रुतिर्वास्ति।

प्रथमातुप्रातिपदिकार्थमात्रेऽनुशिष्टा। अतश्शपदस्समभिव्याहाररूपेणवाक्येनात्रशेषिशेषिभावबाधश्श।

विधिवाक्यतःकर्तव्यत्वेनावगतस्यकेनप्रकारेणकर्तव्यमितिविशिष्यज्ञायमानस्यइतिकर्तव्यताकांक्षा

प्रकरणं। तद्विविधंमहाप्रकरणमवांतरप्रकरणंचेति। तत्राद्येनदर्शपूर्णमासादिकंप्रतिप्रयाजादीनांद्वि

तीयेनप्रयाजादिकंप्रतिअभिक्रमणादीनांचतत्रतत्रसन्निधिसमाम्नातानांशेषता। स्थानंद्विविधं। यथा

संख्यंसन्निधिश्च। तत्राद्येनदोग्धस्यपदध्योपयासमित्तिमंत्रस्यआग्नेयाग्नीषोमीयमंत्रद्वयमध्याम्ना

म्नानस्याग्नेयाग्नीषोमीयसाहचर्यपदधात्तृतीयापशुयाजशेषतासन्निधिस्त्वाम्नानसंनिधिरनुष्ठा

नसन्निधिरितिद्विविधश्च। आद्येनसांनाय्यदेवताकर्मपादेदवयत्यापाइतिमंत्रस्यमहाप्रकरणावांत

रणकरणं दर्शसान्नाय्यपात्रप्रोक्षणशेषता। द्वितीये तु धर्माणामग्नीषोमीयपशुशेषता। समाख्या यौगिकी संज्ञा सा वैदिकी लौकिकी च द्विधा। होतृचमस इति वैदिकसमाख्यया होतुश्चमसभक्षणं प्रत्याध्वर्यवमिति याज्ञिकप्रसिद्धलौकिकसमाख्यया ऽध्वर्योरवघातादिकं प्रति च कर्तव्यत्वेन शेषत्वमेवं शेषिशेषभावः सापवादस्तृतीयाध्याये प्रपञ्चितः। एवं सिद्धशेषशेषिभावानां कर्मणामनुष्ठानशक्तिरूपा प्रयुक्तिश्चतुर्थे निरूपिता॥ ॥ शेष्यः शेषप्रयुक्त्या ऽऽत्मसिध्यर्थमनुष्ठापयति। तदनुनिष्पाद्यपि नापि शेषः शेषिणं प्रयुङ्क्ते। अनेकशेषिसद्भावे ऽपि यत्रान्यप्रयुक्तस्यान्यत्र विनियोगः। तत्र यत्प्रयुक्तस्यान्यत्र विनियोगः स एव शेषं प्रयुङ्क्ते न तु शेष्यपि सन्नन्यो ऽपि। एवं यत्तप्ते पयसि दध्यानयतीति वाक्ये विधीयमानस्य दध्यानयनस्यामिक्षाकर्मकस्य कर्मान्तराकाङ्क्षायां समभिव्याहृतेन पयसः कर्मान्तरत्वेनान्वीयमाने। सम्बन्धाधिकरणत्वेन निर्देशात् प्रधानकर्मतया पर्यवस्यतीति प्रकृतप्रधानकर्मत्वं पयसः परामृष्टमिति तेन सामान्यनो ऽधिकरणत्वेन निर्दिष्टतया पयोरूपत्वेनावगतामिक्षैव शेषित्वात्। स्वशेषभूतं दध्यानयनमनुष्ठापयति। न तु तदनुनिष्पादि वाजिनमपीति आमिक्षापचारे एव पयोन्तरे दध्यानयनस्य प्रयुक्तिः। न वाजिनापचारे। कृष्णविषाणया कण्डूयते। चात्वाले कृष्णविषाणां प्रास्यतीति कृष्णविषाणायाः कण्डूयनप्रासनरूपक्रियाद्वयसम्बन्धे सत्यपि कृष्णविषाणयेति तृतीयया कण्डूयने प्रति शेषः प्रासने प्रति तु द्वितीयया शेषिणीति निर्दिष्टं कण्डूयनप्रयोजनकायास्तस्याः प्रासनात्सत्ययमपचारे प्रासनार्थे न पुनः कृष्णविषाणान्तरोपादानप्रयुक्तिः। पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशप्रयुक्तस्यैव कपालस्य तुषोपवापे प्रत्यविशेषत्वेन विनियोगः। यत्र पुरोडाशो नास्ति तत्र तुषोपवापार्थं कपालं न प्रयुङ्क्ते इत्येवं सापवादा प्रयुक्तिश्चतुर्थाध्याये प्रपञ्चिता। एकप्रयोगान्तर्गतानां गुणप्रधानानामनुष्ठानक्रम पिता। तत्राध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्म

णे दीक्षणीयेष्टौ श्रुत्या गृहपत्यादीनां मुख्यत्वेन तानां सप्तदशानां सर्वेषामृत्विजां दीक्षा क्रमः ॥ अग्निहोत्रं जुहोति यवा
गूं पचतीत्यत्र होमद्रव्यनिष्पत्त्यर्थं यवागूपाकप्रयोजनरूपेणार्थेन पाकहोमयोः क्रमः ॥ समिधो यजतीत्यादिविधिवि
हितानां प्रयाजानां विधिवाक्यपाठक्रमेण क्रमः ॥ वाजपेये प्राजापत्यानां पशूनां प्रतिपश्वावर्त्तनीये यूपाकरणे नियोज
नादिषु उपाकरणे यतः कृताभ्यास[illegible] समापिते नैवं क्रमेण नियोजनादिः क्रमः ॥ साद्यस्क्रे तु स
ह पशूनालभत इति श्रुत्या सवनीयस्थाने एवाग्नीषोमीयसवनीयानुबन्ध्यानां त्रयस्यापि सहकर्त्तव्यतया प्राप्तौ स
वनीयस्थाने प्रथमं सवनीयपशोः उपाकरणं ॥ अनन्तरम् अग्नीषोमीयानुबन्ध्ययोरिति क्रमः ॥ दर्शपूर्णमासे नाव्यस्या
मुख्यक्रमेण आज्यभागशेषाभिघारणा क्रमः ॥ इत्येवं कृत्यादि[illegible] क्रमः ॥ सापवादः प्रपञ्चितः ॥ एवं द्वितीय उत्पत्ति[illegible]विधि
प्रमेयस्य क्रमेण तृतीये विनियोगविधिप्रमेयस्य शेषविशेषभावस्य ॥ चतुर्थपञ्चमयोः प्रयोगविधिप्रमेययोः
प्रयुक्तिक्रमयोश्च निरूपणानन्तरं ॥ षष्ठे अधिकारविधिप्रमेयः फलसंबन्धो निरूपितः ॥ तत्र स्वर्गकामादिपदं विधिप्र
युज्यमानं तत्पुरुषप्रयोजकत्वात् [illegible] फलविशेषाच्च यपरं न तु वेदनादिरूपयागादि द्रव्यसमर्पकं तच्च फलं स्वर्गकाम इत्या
द्युद्देश्यगतलिङ्गविशेषस्याविवक्षितत्वात् स्त्रीणामप्यविशिष्टो नहि कामा[illegible] वैकैकस्य [illegible] फलं न तु
परिषत्कृतं फलमिति ॥ एकैकस्य फलावेदयव[illegible] द्रव्यसमादिरूपेणाधिकारः ॥ सापवादः प्रपञ्चितः ॥ एवं विधिचतुष्टयप्र
मेयात्मक उपदेशविचारः सर्वषट्केन कृतः ॥ ततः परमध्यायचतुष्टयेन अतिदेशविचारः ॥ [illegible] कर्तव्यमित्यतिदे
शः ॥ तत्र सप्तमाष्टमयोर्वचननामधेयवादकृतातिदेशो निरूपितः ॥ [illegible] नामके कृतौ [illegible] ध्यायाम्नातन सम ३

नमितरच्छोमेनेनेति प्रत्यक्षवचनेनन्वयेन वैशेषिकांगानामिषावतिर्दर्शपूर्णमासमग्निहोत्रं जुहोतीत्यत्र नित्याग्निहोत्रे अग्निर्देवताऽऽ
ज्याद्वाता त्वाभ्यशान्निकेन तत्सादृश्यविधित्वया कुंडपायिनामयने कर्मणि प्रयुक्ते नाग्निहोत्रनामधेये न नास्मिन्नित्याग्निहोत्रधर्मा
णामतिदेशश्च सापवादः स सप्तमे पादत्रयेणाभिहितः। पितृत्वचतुर्थपादे सौर्यं चरुं निर्वपेदित्यादिषु नुपदिष्टधर्मेषु प्रत्यक्षवचनस्य

म नऽ [illegible] चातिदेशिकस्याप्यभावेऽपि कुतश्चिद्दृष्टिकात्कर्मणो धर्मप्रापकं वचनमस्तीत्यनुमानिकवचनरूपेण चोदकेना
तिदेशार्थसामान्यतो निरूपितः॥ अष्टमे तु कस्य कुतो धर्मप्राप्तिरित्याकांक्षायां द्रव्यदेवतासादृश्यविशेषलिंगाद्दृष्टीनां द
र्शपूर्णमासतो धर्मप्राप्तिः। अग्नीषोमीयपशुतः पशूनां। सवनीयादेः कादशिनीनां। ज्योतिष्टोमात्सत्त्वामानां द्वादशाहा
दहर्गणानां। गवामयनात्सांवत्सरसत्त्राणामित्येवंरूपो विशेषातिदेशः सापवादः प्रपंचितः। अतिदिष्टा

र्थो नां मंत्रसामसंस्काराणां प्राकृतपदार्थकार्यापन्नवैकृतपदार्थेतरासंबंधेन अन्यथाभावकृतोहो नवमेऽभिहितः। प्रकृता
पदार्थकार्यापत्तिः प्रत्यक्षेणानुमानेन प्रत्यक्षवचनेन प्रत्यक्षवचनानुकृतनिवृत्त्यनुमितिघटितेन प्रत्यक्षवच

५ नानुगतलिंगान्नीतानिहत्यनुमितशब्देनवावसीयते नैवारश्चरुरित्यत्र प्रकृतव्रीहिकार्ये हविर्निष्पाद
कत्वं प्रत्यक्षेणावसीयते न तु नैवारमितितातद्धितेन तस्य रमितिसंबंधसामान्यमात्रप्रत्ययविधाना
तोत स्य प्रकृतिविकारभावरूपसंबंधविशेषपर्यवसायित्वकल्पनायाः प्रत्यक्षाधीनत्वात्। नैवा
तदरूपपरिष्कृत्य त्वमुदकक्ष्माने व्रीहीणां नखनिर्भिन्नमिस्पत्वत्रोक्षस्य नखस्य प्राकृतोलूखलमुस
लकार्यापत्तिः प्रत्यक्षेणावसीयते। उलूखलमुसलाभ्यां व्रीहीणामवहननेनिष्पाद्यते॥७॥

न खन नतेषां निर्भेदनमितिप्रत्यक्षेणकार्यभेदस्यैव दर्शनात्। किंत्ववहननेनैव निर्भेदनेनापितुषविमोकात्। तंडुलनिष्पत्तिदर्शनेन प्राकृता
व घातस्योलूखलमुसलकार्यतायां यद्यपि विवक्षितं तंडुलनिष्पादनेन अपूर्वोपयोगिक्रियालंतन्निर्भेदनेपि समानमितितेन रूपेणावहन
नानिर्भेदनयोरैकार्थ्यस्यानुपपत्त्वात्। तत्कार्यापत्तिरनुमानेनावसीयते। तापरिधौ पशुं नियुंजीतेत्यत्र प्राकृतयूपकार्ये पशुनियुंजने परिधेर्विनियोग
त्र सस्वरवचनेनाविधीयते। नानगिरागिरे तिङ् यादेरस्तोऽज्य मित्यगिरागिरा कृप्रतिषेधात्तयागिरापदनिवृत्यात्कार्यस्यसाध
नापेक्षत्वावगमा न कार्यवाचिपदमनुमायगिरापदकार्यार्थमेरेकत्वाञ्ज्यमित्येवं रूपाणकृतानुमितेकदेशनिष्पादितेन वाक्येन गि
रापदकार्यापत्तिरिरापदस्यावसीयते। यस्याभयं हविरार्त्तिमार्छेदैंद्रं पंचशरावमोदनं निर्वपेदित्यत्र पंचशरावद्रव्यकरणयागस्य दर्श
कार्यापत्तौ दर्शनिवृत्तिर्न प्रत्यक्षवचनादवगम्यते। किंतु द्रव्यविनाशादवगम्यते॥ तन्निवृत्तेः कार्यस्य साधनापेक्षत्वात्तद्विपरमनुमाय
दर्शकार्यार्थं ऐंद्रं पंचशरावमोदनं निर्वपेदिति श्रुतानुमितैकनिष्पाद्येन वाक्येन पंचशरावयागस्य दर्शकार्यापत्तिरवसीयते। नासप्रत्यावेन
स्यानामिति षष्ठाध्यायाधिकरणस्य पञ्चरीत्याद्युदाहरणं। सिद्धांते तु द्रव्यापचारे द्रव्यांतरानयनेन दर्शनिष्पत्तेर्न तन्निवृत्त्यनय
नमस्तीत्युदाहरणांतरमन्वेषणीयं॥ एवं कार्यापत्त्या व्रीहिधर्माणामवघातादीनां नीवारेषु उलूखलमुसलधर्माणां प्रोक्षणादीनां नखस्व
पधर्माणाम् अपि परिव्याणादीनां परिधौ सोऽहः संस्कारो ह्यः गिरापदगतानि शिक्रियायाद्या पदहह हहसामाहः दर्शधर्माणां सिद्धानेन
पंचशरावयागे मेत्राहस्त प्र प्र एवं कविसम्रहृति मात्रमुपघाते। यथा अग्नये जुष्टं निर्वपामीत्यत्र अग्निपदस्थाने चरौ सूर्यायेति। क्वचिल्लिं
गमात्रमुपघाते। यथा वस्यासि रुद्रासीत्यकहायनीमंत्रे क्वचिति विशेषविहितालाम ऋयणीवसीशाघवस्तु रसि रुद्रासीतिक्वचिद्वचनमात्र
मुपघाते। यथा छागस्य वपाया मेदस इतिमंत्रे प्राजापत्यपशुप्राप्ते छागानामिति क्वचित्सहृति र्लिंगं चोपघाते। यथा अग्नये जुष्टमित्यदिति
चरुप्राप्तौ मंत्रे अदित्यै जुष्टमिति क्वचित्सहृति र्वचनं चोपघाते। यथा तस्मिन्नेव मंत्रे वैश्वदेवयत्रे प्राप्ते विश्वेभ्यो देवेभ्य इति क्वचित्
लिंगं वचनं चोपघाते। यथा प्रस्मा अग्निं भरतेति मंत्रे मह द्र पालमैतिविहितानुपशुप्राप्ते प्रागम्यो अग्निमिति क्वचित्

पूष्णे वैश्वदेवत्वस्य प्राप्ते विश्वेभ्यो देवेभ्य इति केचिल्लिंगवचनं ग्राह्यतो यथाऽदितिरिति मंत्रे आज्यप्रोक्षणीमेति सोमारौ
द्रव्यरौ विहिते घृते प्राप्तघृतमेवेति। क्वचित् सकलस्यापदस्याभ्यासरूप ऊहः यथा एकधास्य त्वचमाछ्यतादिति मंत्रे पशुगणाम्ना
मे एकधैकधेति। एवमूहसापवादानव मेप्रपंचितः। एवमातिदेशिकपदार्थगतरूपोतरात्मक ऊहनिरूपणान्तरं तन्निवृत्या
त्मको बाधो निरूप्यते। निवृत्तिश्च नकस्यचिदतिदेशवाक्यप्रवृत्तिकाले प्रकृतौ विदितेज्ञाते ननत्प्राप्तस्यासंभवान्
यथा दर्शपूर्णमासांगभूताया अन्वाहार्यभर्णीयामाः नखारैर्भर्णीया विधानसमये दर्शपूर्णमासयो रात्रिभर्णीयां गोमति निवि
ज्ञातं। येन सा पिष्टयाजादिवत् अतिदेशवाक्येन गृह्येत। कस्यचिदतिदेशवाक्यप्रवृत्तिकालप्रकृतौ विज्ञातस्याप्यसंभवा
न्निवृत्तिः। यथा पावमानेष्ट्याम् अग्निहोत्रहवण्याः। प्राप्ताग्निहोत्रे कुतः साग्निहोत्रहवणी। प्रकृतावग्निहोत्रहवण्या
हवींषि निर्वपतीत्यत्र निर्वापकरणत्वेन ग्राह्याति स्थिते। न च पावने ऽपि समसे अग्निहोत्रं कुतः। क्वचिद्द्वारलोपान्निवृत्तिः। न
द्वारलोपः। क्वचिद्द्वारस्याभिमतस्य स्वतःसिद्धतया। कृष्णलेष्ववघातद्वारस्य वैतुष्यस्य स्वतःसिद्धतया ऽवघातस्य निव
त्तिः। क्वचित् पूर्वसिद्धतया। यथा खले वालीयूपो भवतीत्यत्र खले वाल्याः प्रागर्यौछेदनतक्षणाभ्यां कृत्य
निखातायाः छेदनतक्षणाद्युच्छ्रयणानां निवृत्तिः। क्वचिद्द्वारसिद्धावपि तन्नाशकत्वात्। यथा प्राशित्रेडाभक्षणार्थेषु कृष्ण
लेषु अभिघारणजन्योपकारस्य स्वादिम्नः संपादयितुमशक्यत्वादभिघारणनिवृत्तिः। क्वचिल्लिङ्गविशेष
विरोधान्निवृत्तिः। यथाऽग्रयणेष्टौ दक्षिणारूपे वत्से अन्वाहार्यधर्मस्य पाकस्य पाके सत्येव वत्सानश्यत्वान्मासम
वदक्षिणास्यात्। क्वचित् साध्यविशेषविरोधात्। क्वचिन्निषेधान्निवृत्तिः। यथा बार्हस्पत्यो नैवारः सप्तदशशराव
श्चरुर्भवतीत्यत्र निर्वापेषु व्रीहिषु चतुरो मुष्टीन्निर्वपतीति अतिदेशप्राप्तस्य चतुर्मुष्टिपरिमाणस्य व्रीहिसा

ध्यसप्तदशशरावपरिमाणचरुरूपसाध्यविशेषाविरोधित्वात् । संख्यामुख्यानन्यतरबाधाभावश्रूयभावे जघ
न्यत्वान्मुख्यैर्निवृत्तिः ॥ क्वचिद्विरोधाभावेपि प्रयोजनाभावान्निवृत्तिः । यथा आग्रयणे दक्षिणारूपे वाससी पा
कस्य प्रकृतौ ह्यन्वाहार्यरूपदक्षिणाद्रव्यानेयम सूर्यं दक्षिणान्नावपरिमितंमहांतसास्तीपचतीतिपाको विहि
तः । इह दक्षिणाद्रव्ये वाससी प्रागेव निष्पन्ने स्थिते तन्निर्वृत्यनुपयोगिना पाकेन द्वारलोपान्निवृत्तिरित्यत्र कि ४
द्वारलोपेन यागस्य नयद्वारतया फलं न यावात्प्रयोजनं तत्सर्वं विवक्षितं । तेन मृते यजमाने क्रियमाणायामिष्टावा
यशास्तु इत्यादि मन्त्राणां विवक्षितफलानां मृतस्य यजमानस्य आयुरादिफललोपान्निवृत्तिरित्युदाहरणमि
त्यादि द्रष्टव्यं । क्वचित्स्वरूपेणानाम्नातपदार्थनिवृत्तिः । सापि अनेकविधा । क्वचिदुपदिष्टपदार्थान्तरान्निवृत्तिः । यथा
औदुंबरो यूपो भवतीति वैकृतपशावतिदेशप्राप्तयूपोद्देशेनौदुंबरस्य प्रकृतिद्रव्यविधौ उदुंबरप्रकृतिकयू
पाकृतस्य विल्वपलाशादेर्विरोधेन प्रकृतित्वासंभवान्निवृत्तिः । क्वचिदुपदिष्टपदार्थगतश्रुतेन नैरपेक्ष्यप्रति
पान्निवृत्तिः । यथा नैवारश्चरुर्भवतीत्यत्र नीवारप्रकृतिकचरौ व्रीहितण्डुलानामपि मिश्रणे न प्रकृतित्वसंभवेपि नी
वारश्चरुः परं तद्धितोस्त्वत्ववगतेन नैरपेक्ष्यप्रतिबोधाद्व्रीहीणां निवृत्तिः । नीवाराणां व्रीहिसापेक्षत्वेन चरुप्रकृतित्वाप्र
सापेक्षमसमर्थमित्यसामर्थ्यान्न द्वितीयोत्पत्तिर्न स्यात् । क्वचिदविरोधेपि नैरपेक्ष्यान्निवृत्तिः । यथा आग्रयणे वासोद
क्षिणावत्सः प्रथमजो दक्षिणेति श्रुताभ्यां वासोवत्साभ्यां स्वविजातीयत्वेन तयोरन्वाहार्यनिरपेक्षकारणा
त्वात् प्राकृतान्वाहार्यदक्षिणाया निवृत्तिः । क्वचिन्नैरपेक्ष्याभावेपि नियमवशान्निवृत्तिः । यथा व्रतपयओ

नरुोतारम

दुंवरः सोमचमसो दक्षिणा सखिप्राय सगोत्राय ब्राह्मणाय देय इति श्रुतेन सोमचमसेन केवलं ब्राह्मणोद्देशेन लौकिकोपाय्यांतरमनपेक्ष्य
ऋत्विजामानंतरसंभवेऽपि श्रुतनियमविधिवशात् आकृत्स्नद्वादशशतदक्षिणाया निवृत्तेरित्याद्युदाहरणीयं। क्वचित्संनिधिपाठात् कृतप
दार्थनिवृत्तिः। प्रतिषेधशास्त्रेण उपःकश्चित् प्राकृतपदार्थनिवृत्तिफलो विधिः सर्वोऽपि विवक्षितः। तेन महापितृयज्ञे नार्षेयं वृणी
ते इत्यनेन आर्षेयवरणवर्जं प्रकृतिवत् कुर्यादिति पर्युदासेन यत्तस्मिन्नार्षेयनिवृत्तिः। याचनते नोपयाजान् करोति नाज्यभागनिषेधात् प्रा
याज्यभागनिवृत्तिः। आज्यभागौ यजतीत्यपूर्वेण अपरविधिना आज्यभागयोः। यागरूपमध्वीयनिवृत्तिः सा सर्वाऽप्यत्रोदाहरणं। ए
6 वं दर्शपूर्णमासयोः कपालेषु श्रपयतीति वाक्यस्य तंडुलहविष्केषु चरित्वात् स्थालीद्युपादाननिह्नवे जैत्राप्राप्तत्रोदाहरणीय। र वप
धरकपालेषु श्रपयतीति विधेस्तंडुलहविष्कास्थाली हि विकृतिषु प्रकृतिवद्व्यापादाननिवृत्तेरेव फलं॥ तथाप्सा धिनमस्सामी भेदि
प्यिरसायम।।।। एवमुपदेशविषये चपद्य यश्च निरूपणीयेषु निरूपितेषु तदुभयसाधारणयोः तंत्रप्रसंगयोर्निरूपणीयत्वात् एका
दशोत्तरं निरूपिता तत्त्रिविधं। फलतंत्रं पदार्थतंत्रमनुष्ठानतंत्रमिति। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र फलमुद्दिश्य पाद्य
मानानामाग्नेयादीनां षण्णां सह द्वावगतेः। राजसूयेन स्वाराज्यकामो यजेतेत्यत्र बहूनामिष्टिपशुसोमानाम् एकेन नाम्ना नत्राभिधानाव
गतेः साहित्यं विवक्षितमिति संहितानां फलत्वं च यथा दाग्नेयादीनां षण्णां फलं राजसूयनामकहोमयागानां च फलं साधारणं तदेत
फलतंत्रं। सह दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत। दर्शपूर्णमासयोश्चत्वार ऋत्विज इति विहितं देशकालक
र्तारः। एकफलसाधनानां कर्मणां यथा यागं साधारण्यात् इत्यनत्य पदार्थतंत्रं। एकफलानामेकदेशकालकर्तृकाणां यदंगजात
ष्पयाजाद्यनुष्ठानं साधारणं। यत्र तु तदनुष्ठाने फलैक्येऽपि देशकालकर्तृणां अन्यतमस्यापि भेदः। तत्र प्रतिप्रधानमंगावृत्तिलक्ष
पामावापः। तत्र द्वादशाहद्वादशानां सामयागानां द्वादशस्वहस्सु कर्तव्यानां कालभेदात्। सुत्याकाले कर्तव्यस्सवनीयपशुप्रभृ

६ सांगानुष्ठानावृत्तिः। वरुणप्रघासेषु नवहविष्कायामिष्टौ विहरद्वयं विधायाध्वर्युकर्तृके विहारे हवींष्यासादयितामारुतीमिव
प्रतिप्रस्थानादक्षिणोस्मिन्निति दशभेदविधानात्तत्र तत्र देशे अष्टानां हविषां मारुत्याश्चांगानुष्ठाने भिद्यत इति देशभेदनत्वरा
त्रिः। तत्रैव। गार्हपत्ये पत्नीसंयाजानून्जुहोतीति विहितानां सांपरास्क्रिकहोमानां देशकालैक्येपि अध्वर्युप्रतिप्रस्थातृरूपकर्तृ
भेदात्कर्तृस्थमपुनकर्त्र त्वाधिष्ठानाभेदेपि कर्तृकारकभेदः। तत्रापि प्रयोगभेदेन अंगानुष्ठानावृत्तिरेव। यथा आग्नावैष्णवमेकादशकपा
पालं निर्वपेद्वामनो दक्षिणा। सोमापौष्णं चरुं निर्वपति श्यामो दक्षिणेत्यादिवाक्यविहितेषु राजसूयान्तर्गतयागेषु देशकालफ
लभेदाप्रतीतावपि वामनाऽनैतेराग्नावैष्णवयागः कर्तव्यः। श्यामानेतः सोमापौष्ण ... वासेवैदक्षिणाव्यवस्थयातत्कर्त्रा
कर्तृरूपैभिद्यत इति। ततः प्रतियागं प्रयोगभेदादंगानुष्ठानावृत्तिः। ... कालभेदेन कर्तव्यानामपि प्रधानानामकर्त्रैकालान्यं
गानि तान्यगृह्यमाणविशेषत्वात्। सर्वप्रयोगैक्ये भवंति। यथा ज्योतिष्टोमे अग्नीषोमीयसवनीयानुबन्ध्यपशूनां दीक्षासुत्यावच्छिन्नेति
तिदीक्षाकालकर्तव्यत्वेन विहितोप्यपशुः। यथा वा द्वादशाहे द्वादशानां ज्य सोमयागानामहर्भेदेन कर्तव्यानां दीक्षोपसदः। ये वैरूपेण
सापवादं तत्रैमकादशे निरूपितं। द्वादशे प्रसंगो निरूपितः। अन्यार्थेनान्यस्य तत्प्रयुक्तिशक्तस्य ... स्योपकारः प्रसंगः। यथा। द्व
भोजनार्थं प्रथममावगतस्याचार्यस्य कृतस्वपाकपरिकरो पश्चादागतस्य स्वयमाचार्येनैरपेक्षेणापि ... स्वपाकपरिष्कृतयुक्तिशक्तिक्ष
स्य जातिरूपकारः। यत्वन्यार्थनस्तये तस्य युक्तिशक्तिरहितमुपक्रियते तेनन्य प्रसंगी। किंतु आचार्यकृतस्वपाकोपक्रियमाणपरिवारका
दिवत् तदुपजीव्यप्रयोजकः। यथा दध्यानयनेनोपक्रियमाणं वाजिनं पुरोडाशस्य च पालेपतितुषोपवापस्य शौनेत सस्यापिननत्प्रयुक्तिश
क्तिः पुरोडाशकपालेनेति सविशेषणोपादानोऽन्यप्रयुक्तोपजीवित्वाविष्करणात्। सचप्रसंगस्त्रिविधः। अनुष्ठानप्रसं

५

गः। परार्थप्रसंगः। आत्मप्रसंगश्चेति॥ तत्र परार्थप्रयाजाद्यनुष्ठानेन पशुपुरोडाशाद्युपकारोऽनुष्ठानप्रसंगः॥
सौमिक्यावेद्यां सामांतर्गतेऽपि पश्वनाद्युपकारः परार्थप्रसंगः॥ याजनादिभिर्ब्राह्मणो धनमार्जयेदिति द्रव्यार्जनशा
स्त्रेण ज्योतिष्टोमादिशास्त्रस्य ऋत्विगपेक्षितस्य विशेषेणैव वर्णिकानामार्त्विज्यमाक्षिप्य प्रवृत्तस्योपकारः आत्म
प्रसंग इत्येवमादिरूपेण द्वादशे सापवादः प्रसंगो निरूपितः॥ श्रू॥ श्रू॥ श्रू॥ श्री॥ अर्थवादार्पितप्राशस्त्यमंत्रस्मा
रितनामधेयावच्छिन्नधात्वर्थानुरक्तकृतिसाध्यत्वादिबोधकप्रत्ययांतपदघटितवाक्यं चोदना॥ श्रू॥ इति श्री
मदप्पय्यदीक्षितविरचितायां पूर्वमीमांसायां द्वादशाध्यायार्थसंग्रहः समाप्तः॥ श्रू॥ श्रीकाशीविश्वेश्वराभ्यां नमः॥ ४६
॥ शाके रव्यष्टषोडशमाने पार्थिववत्सरे तथा॥ आषाढे शुक्लपक्षे तु दशम्यां बुधवासरे॥ भायभट्टतनूजेन ग्रानीद
वनवासिना॥ लिखितं विश्वनाथेन विदुषां परितुष्टये॥ श्रीरस्तु॥ श्रू॥
अनंतं यस्माकृतिरहितमाद्यं सच्चित्सुखवपुः परात्मज्ञेदं तत्प्रकरविशदं प्रस्तुतं दिति॥
अखंडार्थे वेद्यं वचननिकरैरोपनिषदैर्महादेवं न्यायाच्छ्रितरपि परमात्मानमिदिति॥ २॥

॥ श्रीमहागणपतयेनमः॥ देवतास्थापनविधिंसम्यग्वक्ष्याम्यशेषतः॥ उपवासंचपूर्वेद्युःक
र्त्तैवविधीयते॥ परेद्युर्मंगलस्नानंदंतधावनपूर्वकं॥

7

४३६२

व:८

मीमांसा